| | |
|---|---|
| विषयः (Subject) | संस्कृतम् (Sanskrit) |
| पत्रसंख्या (Paper Number) | 08 |
| पत्रविषयः (Title) | वैदिकग्रन्थाः व्याकरणं च<br>( Vedic texts & grammar ) |
| पाठ्यांशसंख्या पाठ्यांशनाम च<br>(Module Number& Module Name) | 07, ब्रह्मणस्पतिसूक्तम् प्रथमभागः<br>( Mantras of Brahmanaspati Suktam-First part ) |
| पाठ्यांशतत्त्वानि<br>(Focal Points of The Module) | १. ब्रह्मणस्पतिसूक्तस्य परिचयः<br>२. ब्रह्मणस्पतिसूक्तोक्तमन्त्राणां-प्रतिपाद्यविषयाः<br>( मूलपदपाठव्याख्या सहिताः ) |
| प्रमुखान्वेषकः<br>(Principal Investigator) | सह-प्रमुखान्वेषकः<br>(Co-Principal Investigator) |
| प्रो.रमेशकुमारपाण्डेयः,<br>कुलपतिः, श्रीलालबहादुरशास्त्री-राष्ट्रियसंस्कृतविद्यापीठम्,<br>नवदेहली 110016 | प्रो.वे.कुटुम्बशास्त्री,<br>पूर्वकुलपतिः,राष्ट्रीयसंस्कृतसंस्थानम्,नवदेहली<br>सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः,वाराणसी<br>सोमनाथसंस्कृतविश्वविद्यालयः, गुजरातः |

| | | |
|---|---|---|
| समन्वयकः<br>(Co-ordinator) | पाठ्यांशलेखकः<br>(Content Writer) | समीक्षकः<br>(Reviewer) |
| प्रो. एस्.एन्. रमामणिः,<br>अद्वैतवेदान्तविभागः,<br>श्रीलालबहादुरशास्त्रीराष्ट्रिय-संस्कृतविद्यापीठम्,<br>नवदेहली-११००१६ | डॉ. देवेन्द्रप्रसादमिश्रः<br>सहाचार्यो वेदविभागस्य,<br>श्रीलालबहादुशास्त्रीराष्ट्रिय-संस्कृतविद्यापीठम्,<br>नवदेहली-११००१६ | प्रो. श्रीकृष्णशर्मा,<br>निदेशकचरः,<br>संस्कृतप्राच्यविद्यासंस्थानम्,<br>कुरुक्षेत्रविश्वविद्यालयः,<br>कुरुक्षेत्रम् |
| पाठ्यांशसंलग्नकम्<br>(Module Tag) | SAN_P8_M07 | |

| आयोजकसंस्था (Anchor Institute) |
|---|
| श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्, नवदेहली 110016 |

विषयसूची-

१.० प्रस्तावना
२.० ब्रह्मणस्पतिसूक्तस्य परिचयः।
३.० ब्रह्मणस्पतिसूक्तस्य महत्त्वं दार्शनिकविचारधाराश्च।
४.० ब्रह्मणस्पतिसूक्तोक्तमन्त्राणां प्रतिपाद्यविषयाः ( मूलपदपाठान्वयव्याख्यासहिताः )
४.१ गणानां त्वा गणपतिं हवामहे इति प्रथममन्त्रस्य पाठः।
४.१.१ पदपाठः
४.१.२ व्याख्या
४.२ देवाश्चित्ते असूर्य प्रचेतसो इति द्वितीयमन्त्रस्य पाठः।
४.२.१ पदपाठः
४.२.२ व्याख्या
४.३ आ विबाध्या परिरापः इति तृतीयमन्त्रस्य पाठः।
४.३.१ पदपाठः
४.३.२ व्याख्या
४.४ सुनीतिभिर्नयसि त्रायते जनम् इति चतुर्थमन्त्रस्य पाठः।
४.४.१ पदपाठः
४.४.२ व्याख्या
४.५ न तमं हो न दुरितम् इति पञ्चममन्त्रस्य पाठः।
४.५.१ पदपाठः
४.५.२ व्याख्या
४.६ त्वं नो गोपाः इति षष्ठमन्त्रस्य पाठः।
४.६.१ पदपाठः
४.६.२ व्याख्या
४.७ उत वा यो नो मर्चयात् इति सप्तममन्त्रस्य पाठः।
४.७.४ पदपाठः
४.७.२ व्याख्या
४.८ त्रातारं त्वा तनूनाम् इति अष्टममन्त्रस्य पाठः।
४.८.१ पदपाठः

४.८.२ व्याख्या

४.९ त्वया वयं सुवृधा ब्रह्मणस्पते इति नवममन्त्रस्य पाठः।

४.९.१ पदपाठः

४.९.२ व्याख्या

४.१० त्वया वयमुत्तमं धीमहे इति दशममन्त्रस्य पाठः।

४.१०.१ पदपाठः

४.१०.२ व्याख्या

५.० विषयसङ्ग्रहः

## १.० प्रस्तावना-

अस्याम् ई-पी.जी. पाठशालायां भवतां स्वागतम्। पूर्वपाठे भवन्तः ऋग्वेदस्य मित्रसूक्तस्य विषये भवता सम्यग् ज्ञानं प्राप्तम्। अत्र ऋग्वेदस्य ब्रह्मणस्पतिसूक्तस्य आदितः दशमन्त्राणां तत्रोपदिष्टानां विषयाणाञ्च साङ्गोपाङ्गम् अध्ययनं पाठेऽस्मिन् करिष्यते।

''सर्वकामप्राप्त्यादिर्मोक्षान्तः पुरुषार्थो वक्तव्य इति वेदः प्रवृत्तः।'' वेदमन्त्राणां प्रत्येकस्मिन् अनेकषु मन्त्रेषु गूढार्थाः सन्ति। अग्नीन्द्रसूर्यविष्णुबृहस्पतिप्रभृतिदेवान् उद्दिश्य पठितेषु मन्त्रेषु त्रयस्ततोऽप्यधिका वा अर्था भवन्ति। यथा- आधिदैविकः, आध्यात्मिकः आधिभौतिकः अधियज्ञीयश्च। यास्काचार्यो 'येन पावक चक्षसेत्पादि वैदिकमन्त्रं निरुक्ते वारचतुष्टयम् उद्धृत्य चतुरः पृथगर्थान् करोति। अग्नीन्द्रसवितृविष्णु-सूर्यबृहस्पतिप्रभृतयः प्राकृतिकशक्तयो देवाः। इमे च देवाः आधिदैविकार्थेन सहाधिभौतिकाध्यात्मिकाद्यर्थानप्यभिदधति कथ्यते। अग्नीन्द्रसूर्यविष्णुबृहस्पतिप्रभृतयोऽपि यदा मन्त्रेषु वर्ण्यन्ते तदा ते देवतेत्यभिधानं भजन्ते। ब्रह्मणस्पतिसूक्ते ज्ञानमहिमा वर्णितः। आध्यात्मिकज्ञानस्य सर्वविधज्ञानस्य देवो बृहस्पतिः। ब्रह्मणस्पतिसूक्तमन्त्रेषु सर्वत्र ज्ञानस्य महिमा वर्णितः।

## २.० ब्रह्मणस्पतिसूक्तस्य परिचयः-

ब्रह्मणस्पतिसूक्तम् ऋग्वेदस्य-शाकलशाखायाः द्वितीयमण्डलस्य त्रयोविंशसूक्तं वर्तते। अस्य सूक्तस्य ऋषिः गृत्समदः, देवता-ब्रह्मणस्पतिः, जगत्यः छन्दश्चास्ति यासु बृहस्पतिशब्दः श्रूयते ता बार्हस्पत्याः। शिष्टाः ब्राह्मणस्पत्याः। ब्रह्मणस्पतिसूक्ते ज्ञानमहिमा वर्णितः। आध्यात्मिकज्ञानस्य सर्वविधज्ञानस्य च देवो ब्रह्मणस्पतिः। अस्मिन् सूक्ते सर्वत्र ज्ञानस्य निरतिशयो महिमा वर्णितः। ब्रह्मणस्पतिना सह वैखरी, मध्यमा, पश्यन्ती, तुरीया परा वाणी च सम्बद्धा। ब्रह्मणस्पतेः कतिपयानि विशेषणानि, मन्त्रा मन्त्रखण्डा वा- गणानां गणपतिः, कवीनां कविः, ज्येष्ठराजः, सहसस्पुत्रः, सुवीर्यः सत्यः, ऋणयाः, कृतब्रह्मा, सिन्धुर्न क्षोदः, बृहस्पतिः, होता, पथिकृत्, विचक्षणः, अधिवक्ता, सप्तास्यः, मन्द्रजिह्वः, सप्तरश्मिः, विश्ववारः, स्वोवेशः, यशस्वी च। भगवती श्रुतिर्वदति-

**पवित्रं ते विततं ब्रह्मणस्पते**
**प्रभुर्गात्राणि पर्येषि विश्वतः।**

**अतप्ततनूनं तदासो अश्नुते**
**श्रृतास इद्वहन्तस्तत् समाशत॥**
**येन देवं सवितारं परिदेवा अधारयन्।**
**तेनेमं ब्रह्मणस्पते परिराष्ट्राय धत्तन्॥**

उद्दिश्येदं कथयति-

**गणानां त्वा गणपतिं हवामहे**
**कविं कवीनामुपमश्रवस्तमम्।**
**ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत**
**आ नः शृण्वन्नूतिभिः सीद सादनम्॥**

अर्थात् हे ब्रह्मणस्पते ब्रह्मणोऽन्नस्य पालयितः! देवादिगणानां सम्बन्धिनां स्वीयानां पतिं क्रान्तदर्शिनां कविम् उपमीयतेऽनयेत्युपमा यद्वा सर्वेषामन्नानामुपमानं श्रवोऽन्नं यस्य स तथोक्तः। अतिशयेनोपमश्रवा उपश्रवस्तमः। ज्येष्ठाः प्रशस्यतमाः, तेषां मध्ये राजन्तं ब्रह्मणां मन्त्राणां स्वामिनं त्वाम् अस्मिन् कर्मण्याह्वयामः किञ्च अस्माकं स्तुतिः श्रृण्वन् त्वं पालनैर्हेतुभूतैः सादनम् सीददंत्यस्मिन्निति सदनम् यज्ञगृहं उपविश।

स ऋषिः पुनः कथयति हे बृहस्पते। सुनीतिभिः जनं अपेक्षितफलं प्रापयसि। जनमापद्भ्यो त्रायसे रक्षसि च। यः यजमानः तुभ्यं हविर्लक्षणमन्नं दाशात् प्रयच्छेत् तम् अंहः पापं पापरूपं दारिद्रयं वा न प्राप्नुयात्। ब्रह्मद्विषः ब्राह्मणानां मन्त्राणां वा द्वेष्टुः तपनः तापकः असि किंच मन्युमीः मन्योः क्रोधस्य परेषां ज्ञानस्य वा हिंसकोऽसि। तव तादृशं माहात्म्यमस्ति। अनेन सूक्तेनर्षिः परमपुरुषार्थसाधनं परब्रह्मज्ञानं स्तुतवान्। उक्तं हि बृहद्धेवतायाम्-

**सुज्योतिः परमं ब्रह्म यद्योगात्समुपाश्नुते।**
**तज्ज्ञानमभितुष्टाव सूक्तेनाथ बृहस्पतिः॥**

## ३.० ब्रह्मणस्पतिसूक्तस्य महत्त्वं दार्शनिकविचारधाराश्च-

मन्त्रेषु स्थाने स्थाने ब्रह्मणस्पतिमहिमा वर्णितः। ब्रह्मणस्पतिशब्दस्य निर्वचन एव 'ब्रह्मणस्पतिर्ब्रह्मणः पाता वा पालयिता वा सन् बृहस्पतिरित्युच्यते। बृहस्पतिशब्दस्य निर्वचनं ''बृहस्पतिर्बृहतः पाता वा पालयिता वा'' भवति। अस्य सूक्तस्य ऋषिः गृत्समदः। ब्रह्मणस्पतिना सह तुरीया परा वाणी सम्बद्धा। सूक्तमन्त्रेषु बहुषु प्रत्येकं

मन्त्रमनेके गूढार्थाः वर्तन्ते। तेषामाविष्कारो महर्षिभिः कार्यः, तथा चाग्नीन्द्रसूर्यसोमसवितृविष्णुब्रह्मणस्पतिप्रभृतिदेवान् उद्दिश्य परितेषु मन्त्रेषु त्रयस्ततोऽप्यधिका वा अर्था भवन्ति। 'क्वचिच्चाध्यात्मिकाधिदैविकाधिभौतिकाधियज्ञोपदर्शनार्थम्। तस्मादेतेषु यावन्तोऽर्था उपपद्येरन्नधिदैविकाध्यात्मिकाधिभौतिकाधियज्ञाश्रयाः सर्व एव ते योज्याः। दुर्गाचार्यो निरुक्तभाष्यभूमिकायां कथयति- 'सर्वकामप्राप्त्यादिर्मोक्षान्तः पुरुषार्थो वक्तव्य इति वेदः प्रवृत्तः। सूक्ते वागाम्भृणी स्वकीयं रूपं महिमानं च स्वयं स्फुटीकरोति। सूक्तमन्त्रेषु सर्वत्र ब्रह्मणस्पतिमहिमा वर्णितः। मनीषिणो ज्ञानिनः सर्वजनहिताय ज्ञानस्य प्रकाशं ज्ञानप्रसारं च कुर्वन्ति- 'सर्वेषामेव दानानां ब्रह्मदानं विशिष्यते'। मनीषिणां समीपे ज्ञानलाभाय गन्तव्यम् ''उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत'' इति। ये मनुष्या वस्तुतो मनुष्या भवन्ति ते प्रेम्णा सर्वजनहिताय श्रेष्ठं ज्ञानं जिज्ञासुभ्यः ददति।

गृत्समदो नाम ऋषिः ब्रह्मणस्पतिम् उद्दिश्येदं कथयति- हे ब्रह्मणस्पते सुगोपाः सुष्ठु पालयिता त्वं यं जनं रक्षसि पालयसि वातं जनं दुःखं न बाधते, दुरितं तत्कारणं पापं च न बाधते। हिंसकास्तं जनं न हिंसन्ति। वञ्चकाः अपि तं जनं न बाधन्ते। स ऋषिः पुनः कथयति- हे बृहस्पते त्वम् अस्माकं पालयिता सन्मार्गकृच्च भवसि। त्वं सर्वज्ञः असि। त्वत्सम्बन्धिने यज्ञाय स्तोत्रैः स्तुमः। हे बृहस्पते पुत्रादीनां पालयितारम् अस्मासु पक्षपातेन अधिकं वक्तारं च हविष्प्रदानस्मान् कामयमानं त्वाम् अस्मिन् कर्मण्याह्वयामः। एवं स ब्रह्मणस्पतिः अनुग्रहदृष्ट्या मनुष्यान् सर्वतः रक्षति। अतः हे ऋत्विजः। तस्मै ब्रह्मणस्पतिदेवाय घृतसंयुक्तं पुरोडाशादिकं प्रयच्छत। पुनश्च ऋषिः कथयति- हे बृहस्पतिदेव! यज्ञेन युक्तः मनुष्यः तुभ्यम् अन्नं ददाति, अतः स मनुष्यः अन्नवान् प्रभवतु। त्वया रक्षिता स अन्नवान् प्रभवतु। वयं ब्रह्मणस्पतिदेवस्य अनुग्रहबुद्ध्यां स्याम। सहसस्पुत्रादयश्च ब्रह्मणस्पतिदेवताया एव महाभाग्यात्कर्मपृथकत्वाद् वा नाना नामानि सन्ति। ब्रह्मणस्पतिदेवः प्राणिनः स्वे स्वे कर्मणि योजयत्सर्वं त्रिलोकीञ्च ज्ञानं प्रयच्छति। ब्रह्मणस्पतिसूक्तम् ऋग्वेदस्य महत्त्वपूर्णभागं विद्यते।

**४.० ब्रह्मणस्पतिसूक्तोक्तमन्त्राणां प्रतिपाद्यविषयाः**

**( मूलपदपाठान्वयव्याख्यासद्धिताः )**

**४.१ गणानां त्वा गणपतिं हवामहे इति प्रथममन्त्रस्य पाठः।**

**गणानात्वागणपतिंहवामहेकविंकवीनामुपमश्रवस्तमम्।**

**ज्येष्ठराजंब्रह्मणांब्रह्मणस्पतआतः शृणवन्नूतिभिःसीदसादनम्॥१॥**

**४.१.१ पदपाठः-**

गणानाम् । त्वा । गणऽपतिम् । हवामहे । कविम् । कवीनाम् ।

उपमश्रवःऽतमम् । ज्येष्ठऽराजम् । ब्रह्मणाम् । ब्रह्मणः । पते ।

आ । नः । शृण्वन् । ऊतिऽभिः । सीद । सदनम् ।।1।।

**४.१.२ व्याख्या-** हे ब्रह्मणस्पते! गणानाम्-देवादि गणानां त्वा-भवन्तम्, गणपतिम्-देवगणरक्षकम्, कवीनाम्-क्रान्तिदर्शिनाम् मध्ये, त्वा-भवन्तम् क्रान्तिदर्शिनम्, हवामहे- आह्वानं कुर्महे। (प्रार्थयामहे) उपमश्रवः- सर्वेषाम् उपमानम्, ज्येष्ठानां- प्रशस्तानाम् मध्ये, राजम्- देदीप्यमानम्, ब्रह्मणां मंत्राणां स्वामिनं त्वाम्, हवामहे आह्वानम् कुर्महे। हे ब्रह्मणस्पते! मन्त्राणां रक्षकः नः- अस्माकम्, आ-समन्तात् शृण्वन्-आह्वानम् शृणोतु, ऊतिभिः-पालनैः, सदनम्-यज्ञभूमिम्, सदि-आसीनो भव निवासं कुरु। यथा वयं सुखिनो भवेम।

**४.२ देवाश्चित् ते असुर्य प्रचेतसो इति द्वितीयमन्त्रस्य पाठः।**

**वेदाश्चित्तेअसुर्यप्रचेतसोबृहस्पतेयज्ञियंभागमानशुः।**

**उस्राइवसूर्योज्योतिषामहोविश्वेषामिज्जनिताब्रह्मणामसि॥२॥**

**४.२.१ पदपाठः-**

देवाः । चित् । ते । असुर्य । प्रऽचेतसः । बृहस्पते । यज्ञियम् ।

भागम् । आनशुः । उस्राःऽइव । सूर्यः । ज्योतिषा । महः ।

विश्वेषाम् । इत् । जनिता । ब्रह्मणाम् । असि ।।2।।

**४.२.२ व्याख्याः-** हे बृहस्पते। बृहतां वाचाम् पते! स्वामिन्! प्रकृष्टं ज्ञानमास्ते, त्वदीयाः देवाश्चित्-देवाऽपि, यज्ञियम्-यज्ञसम्बन्धिनम्, भागम्-भागधेयम् हविः, आनशुः- जानन्तु। ज्योतिषा-तेजसा, महो-महनीयः, सूर्यः-आदित्यः, उस्ता-किरणाः, इव-यथा विश्वेसाम्- सर्वेषाम्, ब्रह्मणा- मन्त्राणाम्, जनिता-उत्पादयिता, अपि अस्माकम् प्रार्थनां श्रुणु।

**४.३ आ बिबाध्या परिरापस्तमांसि च इति तृतीयमन्त्रस्य पाठः।**

**आविबाध्यापरिरापस्तमांसि च ज्योतिष्मन्तंरथमृतस्यतिष्ठसि।**

**बृहस्पतेभीममित्रदम्भनंरक्षोहणंगोत्रभिदंस्वर्विदम्॥३॥**

**४.३.१ पदपाठः-**

आ । विऽबाध्य । परिऽरपः । तमांसि । च । ज्योतिष्मन्तम् । रथम् ।

ऋतस्य । तिष्ठसि । बृहस्पते । भीमम् । अमित्रऽदम्भनम् ।

रक्षःऽहनम् । गोत्रऽभिदम् । स्वःऽविदम् ।।3।।

**४.३.२ व्याख्या-** हे बृहस्पते! परिरापः- पापरूपं रक्षः, तमांसि-अन्धकारं अज्ञानतां च विनाशय। तेजसा निराकृतः। तव-रथम्-स्यन्दनम्, ज्योतिष्मन्तम्-प्रकाशशीलम्, तस्य-तस्योपरि, त्वम् तिष्ठसि-निवससि। भीमम्-भयंकरम्, अमित्रदंभनम्-शत्रूणांहिसकम्, राक्षसानां-राक्षसप्रभृतिदेवद्रोहिणाम् हिंसाकर्तारम्, गोत्रमिदम्-मेघानां हन्तारम्, स्वर्विदम्-स्वर्गस्य लोकस्य विदम् वेत्ति जानाति वा स्वर्विदम-स्वर्गलोकस्य वेत्तारं रथम् अधितिष्ठसि। ईदृशं रथमारुह्यो भवतु इत्यर्थः।

**४.४ सुनीतिभिर्नयसि त्रायसे जनम् इति चतुर्थमन्त्रस्य पाठः।**

**सुनीतिभिर्नयसित्रायसेजनंयस्तुभ्यंदाशान्नतमंहोअश्नवत्।**

**ब्रह्मद्विषस्तपनोमन्युमीरसिबृहस्पतेमहितत्तेमहित्वनम्॥४॥**

**४.४.१ पदपाठः-**

सुनीतिऽभिः । नयसि । त्रायसे । जनम् । यः । तुभ्यम् । दाशात् ।

न । तम् । अंहः । अश्नवत् । ब्रह्मऽद्विषः । तपनः । मन्युऽमीः ।

असि । बृहस्पते । महि । तत् । ते । महिऽत्वनम् ।।4।।

**४.४.२ व्याख्याः-** हे बृहस्पते! बृहतां वाचां पतिः रक्षक! सम्बोधने हे बृहस्पते! ब्रह्मणस्पते, सुनीतिभिः-शोभननीतिभिः-सुनयैः यजमानाय नयसि-धनं प्रापयसि अभिलसितं फलं ददासि चायसि-यजमानम् आपद्भ्यो रक्षसि। यः यजमानः तुभ्यम् दाशात्-हविर्ददाति तं यजमानम् अंहः पापात् न नहि अश्ववत्-प्राप्नोतु। ब्रह्मद्विषे ब्राह्मणानां द्वेषकारिणां, तपनः- तापकोऽसि- मन्युमीरसि क्रोधस्य हिसंकोऽसि, महि-श्रेष्ठम् प्रभूतम्, ते- भवतः महित्वनः, प्रभूतं तव माहात्म्यम्। यः यजमानः ब्रह्मणस्पतिं स्तौति तस्य महिमा वर्द्धते सः सुखिनः संजातः।

**४.५ न तमंहो न दुरितं कुतश्चः इति पञ्चममन्त्रस्य पाठः।**

**नतमंहोनदुरितंकुतश्चननारातयस्तितिरुर्नद्वयाविनः।**

**विश्वाइदस्माध्वरसोविबाधसेयंसुगोपारक्षसिब्रह्मणस्पते॥५॥**

**४.५.१ पदपाठः-**

न । तम् । अंहः । न । दुःऽइतम् । कुतः । चन । न । अरातयः ।

तितिरुः । न । द्वयाविनः । विश्वाः । इत् । अस्मात् । ध्वरसः ।

वि । बाधसे । यम् । सुऽगोपाः । रक्षसि । ब्रह्मणः । पते ।।5।।

**४.५.२ व्याख्याः-** हे ब्रह्मणस्पते-वेदवाणीनाम् रक्षकः सुगोपा शोभनेन गोपयिता त्वं यं जनं रक्षसि- पालयसि, तं जनम् दुरितम्-दुःखं न बाधते। तं पुरुषम् अंहः-पापं न बाद्यते। अरातयः-शभवः हिंसकाः वा जनं कुतश्चन-कास्वपि दिक्षु न तितिरः-कुत्रापि हिंसा नहि भवति। ह्वयाविनः वंचकारपि न बाधन्ते। सर्वतः सः जनः सुरक्षितो वर्तते। विश्वाः- सर्वाः, घवरसः हिंसकाः, यं जनं त्वं रक्षसि सः जनः सर्वतः सुगोपाः सर्वविधिना सुरक्षितो वर्तते।

**४.६ त्वं नो गोपाः पथिकृद् विचक्षण इति षष्ठमन्त्रस्य पाठः।**

**त्वंनोगोपाः पथिकृद्विचक्षणस्तवव्रतायमतिभिर्जरामहे।**

**बृहस्पतेयोनोअभिह्वरोदधेस्वातंमर्मर्तुदुच्छुनाहरस्वती॥६॥**

**४.६.१ पदपाठः-**

त्वम् । नः । गोपाः । पथिऽकृत् । विऽचक्षणः । तव । व्रताय ।

मतिऽभिः । जरामहे । बृहस्पते । यः । नः । अभि । ह्वरः । दधे ।

स्वा । तम् । मर्मर्तु । दुच्छुना । हरस्वती ।।6।।

**४.६.२ व्याख्याः-** हे बृहस्पते- हे वाचां पते! त्वम्-भवान्, नः- अस्माकम्, गोपाः-रक्षकः, पथिकृत्-सन्मार्गमपि शिक्षयसि, विचक्षणः-सर्वज्ञस्त्वम्- तव=भवतः, व्रताय-तवसम्बन्धिने यज्ञायुमतिभिः-स्तोत्रैः, जरामहे- स्तुतिं कुर्महे। हे बृहस्पते! यः-त्वम् नः-अस्मान् अभि-सर्वतः हरः-कौटिल्यं दधे-धारयसि तं-पूर्वोक्तम् स्वा-स्वीया, दुच्छुना-दुर्बुद्धिम्, हर-विनाशय। एशभूणाम हृदये यत् कौटिल्यम् वर्तते तं मर्मर्तु=मोचयतु दूरीभवतु।

**४.७ उत वा यो नो मर्चयादनागसो इति सप्तममन्त्रस्य पाठः**

**उतवायोनोमर्चयादनागसोरातीवामर्तः सानुकोवृकः।**

**बृहस्पतेअपतंवर्तयापथःसुगंनोअस्यैदेववीतयेकृधि॥७॥**

**४.७.१ पदपाठः-**

उत । वा । यः । नः । मर्चयात् । अनागसः । अरातिऽवा । मर्तः ।
सानुकः । वृकः । बृहस्पते । अप । तम् । वर्तय । पथः । सुऽगम् ।
नः । अस्यै । देवऽवीतये । कृधि ।।7।।

**४.७.२ व्याख्या-** हे बृहस्पते! उत्-अपि च यः-यादृशः, नः अस्माकम्, अरातीवा-अभिमुखम्-आगच्छतु विनाशयतु, सानुकः-समुच्छ्रितम्-धनादीनामदाता, तान् यः मर्तः-यः मनुष्यः, अनागसः-अपराधरहितान्, तस्य मर्चयात् हिंसा मा भवतु तं मर्तं पथः वैदिकात् मार्गात्, वर्तय-निवर्तय, नः-अस्मान्, अस्यै अस्मै देववीतये-यज्ञाय नो-अस्माकम्, सुगम्-शोभनम्, पथम्-मार्गम् कृधि-कुरु। यज्ञानुष्ठानायास्माकं सुमतिं देहि।

**४.८ त्रातारं त्वा तनूनां हवामहे इति अष्टममन्त्रस्य पाठः**

**त्रातारंत्वातनूनाहवामहेवस्पर्तरधिवक्तारमस्मयुम्।**
**बृहस्पतेदेवनिदोनिबर्हयमादुरेवाउत्तरंसुन्नमुन्नशन्॥८॥**

**४.८.१ पदपाठः-**

त्रातारम् । त्वा । तनूनाम् । हवामहे । अवऽस्पर्तः । अधिऽवक्तारम् ।
अस्मऽयुम् । बृहस्पते । देवऽनिदः । नि । बर्हय । मा । दुःऽएवाः ।
उत्ऽतरम् । सुन्नम् । उत् । नशन् ।।8।।

**४.८.२ व्याख्या-** हे बृहस्पते! अवस्पतः-उपद्रवेभ्यः पारयतिः तनूनां-पुत्रादीनाम् त्रातारम्-रक्षकम् अधिवक्तारम् वयं हविप्रदानाय, कामयमानाः त्वां हवामहे-आह्वानं कुर्महे देवनिदः-देवनिन्दकानसुरान् निवर्हय-विनाशय, दूरेवाः- दुष्टान् शत्रून्, उत्तरम्-उत्कृष्टतरम्, सुखं मा अस्मान् उन्नशन् व्याप्नु- वन्तु देवनिन्दकाः राक्षसाः सुखिनो मा भवन्तु वयम् उत्कृष्टं सुखं प्राप्नुयाम।

**४.९ त्वया वयं सुवृधा ब्रह्मणस्पते इति नवममन्त्रस्य पाठः**

**त्वयावयंसुवृधाब्रह्मणस्पतेस्पार्हावसुमनुष्याददीमहि।**
**यानोदूरेतळितोयाअरातयोभिसन्तिजम्भयाताअनप्नसः॥९॥**

**४.९.१ पदपाठः-**

त्वया । वयम् । सुऽवृधा । ब्रह्मणः । पते । स्पार्हा । वसु । मनुष्या ।

आ । ददीमहि । याः । नः । दूरे । तळितः । याः । अरातयः । अभि ।
सन्ति । जम्भय । ताः । अनप्नसः ॥9॥

**४.९.२ व्याख्या**- हे ब्रह्मणस्पते! त्वया-त्वया सह, वयं यजमानाः, सुवृधा-शोभनं वर्द्धयिता, त्वया हेतुना वयं स्पार्हा- स्पृहणीयानि, वसु-धनानि, मनुष्येभ्यो दातृभ्यो आददीमहि-गृणीमहे। यः-यादृशः नः-अस्माकम्, दूरे-दूरदेशे-अरातयः-शत्रवः, याश्च नो-अस्माकम् तडितो-समीपनिवासिनः शत्रवः तान् सर्वान् अरातीयान्-शत्रून्, जंभय-विनाशय, ताः- सर्वान् शत्रून्, अनप्नसः- रूपहीनान् कुरु सर्वतोभावेन विनाशय।

**४.१० त्वया वयमुत्तमं धीमहे वयो इति दशमन्त्रस्य पाठः।**

**त्वयावयमुत्तमंधीमहेवयोबृहस्पतेपप्रिणासस्निनायुजा।**

**मानोदु:शंसोअभिदिप्सुरीशतप्रसुशंसामतिभिस्तारिषीमहि॥१०**

**४.१०.१ पदपाठः**-

त्वया । वयम् । उत्ऽतमम् । धीमहे । वयः । बृहस्पते । पप्रिणा ।
सस्निना । युजा । मा । नः । दुःऽशंसः । अभिऽदिप्सुः । ईशत ।
प्र । सुऽशंसाः । मतिऽभिः । तारिषीमहि ॥10॥

**४.१०.२ व्याख्या**- हे बृहस्पते-ब्रह्मणस्पते! त्वया-तव हेतवे वयं यजमानाः उत्तमं-विधिपूर्वकम्, धीमहे स्तुतिं कुर्महे धारयामः। वयः-हविलक्षणमन्नं पप्रिणा-कामानां पूरयिता, सविना-मुदेन प्रसन्नेन युजा-सहायेन, मा-नहि, नः-अस्मान् दु:शसः-दु:शंसनीयः, अभिदिप्सः-अभिभवितुम्। वयं यजमानाः अस्मान् नहि ईशत-स्वामिनो भव वयं, मतिभि-स्तोत्रैः, सुशंसाः शोभनस्तुतय कुर्महे- अतः-अस्माकम् हिंसा मा भवतु।

**५.० विषयसङ्ग्रहः**-

अस्मिन् पाठे ऋग्वेदीयशाकलशाखायाः द्वितीयमण्डलान्तर्गतब्रह्मणस्पतिसूक्तं मूलमन्त्रपदव्याख्यासहितं प्रस्तुतम्। अस्मिन् सूक्ते ब्रह्मणस्पतिदेवस्य महत्वं वर्णितम्। तत्त्वज्ञानस्य आध्यात्मिकज्ञानस्य, सर्वविधज्ञानस्य च देवो ब्रह्मणस्पतिः। सूक्तमन्त्रेषु सर्वत्र ज्ञानस्य निरतिशयो महिमा वर्णितः। अनेन सूक्तेन ऋषिः परमपुरुषार्थसाधनं परब्रह्मज्ञानं स्तुतवान् अतस्तद्देवत्यमिदम्। उक्तं हि बृहद्देवतायाम्-

**सुज्योतिः परमं ब्रह्म यद्योगात्समुपाश्नुते।**

**तज्ज्ञानमभितुष्टाव सूक्तेनाथ बृहस्पतिः॥**

सहसस्पुत्रादयश्च ब्रह्मणस्पतिदेवताया एव महाभाग्यात्कर्मपृथकत्वाद् वा नाना नामानि सन्ति। ब्रह्मणस्पतिसूक्तम् ऋग्वेदस्य महत्त्वपूर्णभागं विद्यते। निगूढार्था वेदमन्त्रा मननेनैवावबुध्यन्ते। अस्मिन् पाठे ब्रह्मणस्पतिसूक्तस्य आदितः दशमन्त्राणां तत्रोपदिष्टानां विषयाणाञ्च अध्ययनं भवता कृतम्। अग्रिमे पाठे भवान् ऋग्वेदस्य ब्रह्मणस्पतिसूक्तस्य अवशिष्टमन्त्राणामध्ययनं करिष्यति। धन्यवादः।

**॥ शं बोभवीतु ॥**